## तृतीयाध्यायस्य द्वितीयः पादः

### कर्मण्यण् । (१/२९१३)

त्रिविधं कर्म, निर्वर्त्यं, विकार्यं, प्राप्यं चेति । सर्वत्र कर्मणि उपपदे धातोः अण् प्रत्ययो भवति । [1]निर्वर्त्यं तावत्--कुम्भकारः । नगरकारः । [2]विकार्यम्--काण्डलावः । शरलावः । [3]प्राप्यम्--वेदाध्यायः । चर्चापारः[4] । ग्रामं [5]गच्छति, आदित्यं [6]पश्यति, हिमवन्तं [7]शृणोति इत्यत्र न भवति, अनभिधानात् (म.भा. २.९४) ।

[२२९] शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् । (म.भा. २.९५)

[8]मांसशीलः, मांसशीला । मांसकामः, मांसकामा । मांसभक्षः, मांसभक्षा । कल्याणाचारः, कल्याणाचारा ।

[२३०] ईक्षिक्षमिभ्यां [9]चेति वक्तव्यम् । (म.भा. २.९५)

[10]सुखप्रतीक्षः, सुखप्रतीक्षा । बहुक्षमः, बहुक्षमा ॥

### ह्वावामश्च । (२/२९१४)

'ह्वेञ् स्पर्धायां [11]शब्दे च' (धा.पा. १००९), 'वेञ् तन्तुसन्ताने' (धा.पा. १००७), 'माङ माने' (धा.पा. १०८९) इत्येतेभ्यश्च[12] कर्मण्युपपदे अण् प्रत्ययो भवति । [13]कप्रत्ययस्यापवादः । [14]स्वर्गह्वायः । तन्तुवायः । धान्यमायः ॥

### आतोऽनुपसर्गे कः । (३/२९१५)

आकारान्तेभ्यः [15]अनुपसर्गेभ्यः कर्मण्युपपदे[16] कप्रत्ययो भवति । अणोऽपवादः । गोदः । कम्बलदः । पार्ष्णित्रम् । अङ्गुलित्रम् । अनुपसर्गे इति किम् ? [17]गोसन्दायः । [18]वडवासन्दायः (३.२.१/२९१३) ॥

### सुपि स्थः । (४/२९१६)

सुबन्ते उपपदे तिष्ठतेः[19] कप्रत्ययो भवति । समस्थः । विषमस्थः[20] । अत्र योगविभागः [21]कर्तव्यः सुपि इति । सुपि आकारान्तेभ्यः[22] कप्रत्ययो भवति । द्वाभ्यां पिबति इति द्विपः । पादपः । कच्छपः[23] । [24]ततः स्थः इति । [25]स्थश्च सुपि कप्रत्ययो भवति । किमर्थमिदम् ? कर्तरि पूर्वयोगः । अनेन भावेऽपि यथा स्यात् । आखूनामुत्थानम् [26]आखूत्थः । शलभोत्थः । [27]इत उत्तरं कर्मणि (३.२.१/२९१३) इति च सुपि इति च द्वयमप्य[28] नुवर्तते । तत्र सकर्मकेषु धातुषु कर्मणि इत्येतदुपतिष्ठते । अन्यत्र सुपि इति ॥

---

1. निर्वर्त्ये अ.ब.क.फ. 2. विकार्ये अ. फ. 3. प्राप्ये अ. फ. 4. व्यासो विज्ञायते इत्यधिकम् फ. 5. ऋच्छति क. 6. पश्य फ. 7. करोति फ. 8. मांसं शीलयति इत्यधिकम् अ.ब. 9. इति वक्तव्यम् नास्ति फ. 10. सुखप्रतीक्षः नास्ति फ. 11. वाचि अ.क.ड, नास्ति फ. 12. धातुभ्यः इत्यधिकम् ड, च नास्ति फ. 13. कस्यापवादः अ. 14. स्वर्गाह्वायः ब. 15. धातुभ्यः इत्यधिकम् ड. 16. च इत्यधिकम् ग. 17. गोसंदायः नास्ति ड. 18. वडवासंदायः नास्ति ग.फ. 19. धातोः इत्यधिकम् अ.ब.क.ग. 20. कूटस्थः इत्यधिकम् अ.क.ग.ड.फ, पर्वतस्थः इत्यधिकम् ग. 21. क्रियते क.ड.फ. 22. धातुभ्यः इत्यधिकम् क. फ. 23. समस्थः विषमस्थः इत्यधिकम् क.ड.फ. 24. तटस्थः अ. क. ड. 25. स्थ इति एको योगः क. 26. आखूत्थं वर्तते अ.क.ग.ड, नास्ति ब.ह. 27. इतः परम् ग. 28. अधिक्रियते क.ड.